॥ श्री जयतीर्थ स्तुतिः ॥

धाटी श्रीजयतीर्थ वर्य वचसां चेटीभवत् स्वर्धुनी
पाटीरानिल फुल्ल मल्लि सुमनो वाटी लसद् वासना ।
पेटी युक्ति मणि श्रियां सुमतिभिः कोटीरकैः श्लाघिता
सा टीका निचयात्मिका मम चिरादाटीकतां मानसे ॥ १ ।
टीकाकृज्जयवर्य संसदि भवत्येकांततो राजति
प्राकाम्यं दधते पलायन विधौ स्तोकान्य शंका द्विः ।
लोकांधीकरण क्षमस्य तमसः सा काल सीमा यदा
पाकाराति दिशि प्ररोहति न चेद् राका निशा कामुकः ॥ २ ॥
छाया संश्रयणेन यच्चरणयोरायामि सांसारिका
पायानल्पतमातप व्यतिकर व्यायाम विक्षोभिताः ।
आयांति प्रकटां मुदं बुध जना हेयानि धिक्कृत्य नः
पायाच्छ्रीजयराट् दृशा सरस निर्मायानुकंपार्द्रया ॥ ३ ॥
श्रीवाय्वंश सुवंश मौक्तिकमणेः सेवा विनम्र क्षमा
देवाज्ञान तमो विमोचन कला जैवातृक श्री निधेः ।
शैवाद्वैत मताटवी कवलना दावाग्नि लीला जुः
को वादी पुरतो जयीश्वर भवेत् ते वादि कोलाहले ॥ ४ ॥
नीहारच्छवि बिंब निर्गत कर व्यूहाप्लुतेंदूपला
नाहार्य सृत नूतनाद्भुत परीवाहालि वाणी मुचः ।
ऊहागोचर गर्व पंडित पयो वाहानिल श्री जु
माहात्म्यं जयतीर्थ वर्य भवतो व्याहारमत्येति नः ॥ ५ ॥
वंदारु क्षिति पाल मौलि विलसन्मंदार पुवली
मंदान्य प्रसरन्मरंद कणिका वृंदार्द्र पादांबुजः ।
कुंदाभामल कीर्तिरार्त जनता वृंदारकानोकहः
स्वं दासं जयतीर्थराट् स्व करुणा संदानितं मां क्रियात् ॥ ६ ॥
श्री दारांघ्रि नतः प्रतीप सुमनो वादाहवाटोपनि
र्भेदातंद्र मतिः समस्त विबुधामोदावली दायकः ।
गोदावर्यदयत् तरंग निकर ह्री दायि गंभीर गीः
पादाब्ज प्रणते जयी कलयतु स्वे दास वर्गेऽपि माम् ॥ ७ ॥
विद्या वारिज ंड चंड किरणो विद्या मद क्षोदयद्
द्राद्याली कदली भिदामर करी हृद्यात्म कीर्ति क्रमः ।

पद्या भोध ततेर्विनम्र सुर राडुद्यान भूमी रुहो
दद्याच्छ्रीजयतीर्थराट् धियमुतावद्यानि भिद्यान्मम ॥ ८ ॥
आभासत्वमियाय तार्किक मतं प्राभाकर प्रक्रिया
शोभां नैव बभार दूर निहिता वैभाषिकाद्युक्तयः ।
ह्रीभारेण नताश्च संकर मुखाः क्षोभाकरो भास्करः
श्री भां जय योगिनि प्रवदति स्वाभाविकोद्यन्मतौ ॥ ९ ॥
बंधानः सरसार्थ शब्द विलसद् बंधाकराणां गिरां
मिंधानोऽर्क विभा परिभव झरी संधायिना तेजसा ।
रुंधानो यशसा दिशः कवि शिरः संधार्यमाणेन मे
संधानं स जयी प्रसिद्ध हरि संबंधागमस्य क्रियात् ॥ १० ॥
सख्यावद् गण गीयमान चरितः सांख्याक्षपादादिनिः
संख्यासत् समयि प्रभेद पटिम प्रख्यात विख्यातिगः ।
मुख्यावास गृहं क्षमा दम दया मुख्यामल श्री धुरां
व्याख्याने कलयेद् रतिं जयवराभिख्या धरोमद् गुरुः ॥ ११ ॥
आसीनो मरुदंश दास सुमनो नासीर देशे क्षणाद्
दासीभूत विपक्ष वादि विसरः शासी समस्तैनसाम् ।
वासी हृत्सु सतां कला निवह विन्यासी ममानारतं
श्री सीता रमणार्चकः स जयराडासीदतां मानसे ॥ १२ ॥
पक्षीशासन पाद पूजन रतः कक्षीकृतोद्यद् दयो
लक्ष्मीकृत्य सभा तले रटदसत् पक्षीश्वरानक्षिपत् ।
अक्षीण प्रतिभा भरो विधि सरोजाक्षी विहाराकरो
लक्ष्मीं नः कलयेज्जयी सुचिरमध्यक्षीकृतक्षोभणाम् ॥ १३ ॥
येनागाहि समस्त शास्त्र पृतना रत्नाकरो लीलया
येनाखंडि कुवादि सर्व सुभट स्तोमो वचः सायकैः ।
येनास्थापि च मध्व शास्त्र विजय स्तंभो धरा मंडले
तं सेवे जयतीर्थ वीरमनिशं मध्वाख्य राजादृतम् ॥ १४ ॥
यदीय वाक् तरंगाणां विप्लु विदुं गिरः ।
जयति श्रीधरावासो जयतीर्थ सुधाकरः ॥ १५ ॥
सत्यप्रिय यति प्रोक्तं श्री जयार्य स्तवं शुभम् ।
पठन् सभासु विजयी लोकोत्तमतां व्रजेत् ॥ १६ ॥
॥ इति श्रीसत्यप्रियतीर्थविरचिता श्रीजयतीर्थस्तुतिः समाप्ता ॥